क्रौञ्चद्वीपस्थपर्व्वतविशेषः। यथा, महाभारते। ६। १२। १७—१८।
"क्रौञ्चद्वीपे महाराज! क्रौञ्चो नाम महागिरिः।
क्रौञ्चात्परो वामनको वामनादन्धकारकः॥
अन्धकारात्परो राजन्! मैनाकः पर्व्वतोत्तमः।
मैनाकात्परतो राजन्! गोविन्दो गिरिरुत्तमः॥"
तीर्थभेदः। यथा, महाभारते। ३। ८४। १२२।
"ततस्तु वामनं गत्वा सर्व्वपापप्रमोचनम्॥"
महापुराणान्यतमः। यथा, देवीभागवते। १। ३। ७।
"अयुतं वामनाख्यञ्च वायव्यं षट् शतानि च।
चतुर्व्विंशतिसंख्यातः सहस्राणि तु शौनक!॥")
विष्णोः पञ्चमावतारः। तस्य प्रादुर्भावो यथा।
श्रीसदाशिव उवाच।
"प्रह्लादस्य सुतो यश्च विरोचन इतीरितः।
तस्य पुत्त्रो महाबाहुर्बलिर्वैश्वानरप्रभः॥
स तु धर्म्मविदां श्रेष्ठः सत्यसन्धो जितेन्द्रियः।
हरेः प्रियतमो भक्तो नित्यं धर्म्मरतः शुचिः॥
स जित्वा सकलान् देवान् सेन्द्रांश्च समरुद्गणान्।
त्रिलोकान् स्ववशे स्थाप्य राज्यं चक्रे महाबलः॥
इन्द्रादित्रिदशास्तस्य किङ्कराः समुपस्थिताः।
भ्रष्टराज्यं सुरपतिं दृष्ट्वा तस्य पिताहितः॥
कश्यपो भार्य्यया सार्द्धं तपस्तेपे हरिं प्रति।
अदित्या सह धर्म्मात्मा पयोव्रतसमन्वितः॥
अर्च्चयामास देवेशं पद्मनाभं जनार्द्दनम्।
ततो वर्षसहस्राणि तेन संपूजितो हरिः॥
तथैवाविरभूत्तस्य देव्या सह सनातनः।
तं दृष्ट्वा जगतामीशं हर्षनिर्भरचेतसा॥
यत्नात् सह नमस्कृत्य तुष्टाव च द्विजोत्तमः॥
कश्यप उवाच।
नमो नमस्ते लक्ष्मीश! सर्व्वज्ञ जगदीश्वर।
सर्व्वात्मन् सर्व्वदेवेश! सृष्टिसंहारकारक॥
इत्यादिस्तुतिभिः सम्यक् स्तूयमानो महर्षिणा।
प्राह गम्भीरया वाचा परितुष्टो जनार्द्दनः॥
सन्तुष्टोऽस्मि द्विजश्रेष्ठ! त्वया भक्त्या समर्च्चितः।
वरं वृणीष्व भद्रं ते करोमि तव वाञ्छितम्॥
ततः प्राह हृषीकेशं भार्य्यया सह कश्यपः।
पुत्त्रत्वं मम देवेश संप्राप्य त्रिदशां हितम्॥
कुरुष्व बलिना देव त्रैलोक्यं निर्ज्जितं बलात्।
इन्द्रस्यावरजो भूत्वा उपेन्द्र इति नामतः॥
येन केनात्ममार्गेण बलिं निर्ज्जित्य मायया।
त्रैलोक्यं मम पुत्त्राय देहि शक्राय शाश्वतम्॥
इत्युक्तस्तेन विप्रेण तथेत्याह जनार्द्दनः।
संस्तूयमानस्त्रिदशैस्तत्रैवान्तरधीयत॥
एतस्मिन्नन्तरे काले कश्यपस्य महात्मनः।
अदित्या गर्भमापेदे भगवान् भूतभावनः॥"
इति पाद्मोत्तरखण्डे ४८ अध्यायः॥
श्रीशिव उवाच।
"अथ वर्षसहस्रान्ते सर्व्वलोकमहेश्वरम्।
अदितिर्जनयामास वामनं विष्णुमच्युतम्॥
श्रीवत्सकौस्तुभोरस्कं पूर्णेन्दुसदृशद्युतिम्।
सुन्दरं पुण्डरीकाक्षं अतिखर्व्वतरं हरिम्॥
वटुवेशधरं देवं सर्व्ववेदान्तगोचरम्।
मेखलाजिनदण्डादिचिह्नैनाङ्कितमीश्वरम्॥
तं दृष्ट्वा देवताः सर्व्वे शतक्रतुपुरोगमाः।
स्तुत्वा महर्षिभिः सार्द्धं नमश्चक्रुर्म्महौजसः॥
ततः प्रसन्नो भगवान् प्रोवाच सुरसत्तमान्।
किं कर्त्तव्यं मया चाद्य तद्ब्रवीत सुरोत्तमाः॥
ततः प्रहृष्टास्त्रिदशास्तमूचुः परमेश्वरम्।
अस्मिन् काले बलेर्यज्ञं वर्त्तते मधुसूदन॥
प्रथमं दानकालोऽयं तस्य दैत्यपतेः प्रभो।
याचित्वा त्रिदिवं लोकं ततस्तं दातुमर्हसि॥
इत्युक्तस्त्रिदशैः सर्व्वैराजगाम बलिं हरिः।
यागदेशे समासीनमृषिभिः सार्द्धमध्वरे॥
अभ्यागतं वटुं दृष्ट्वा सहसोत्थाय दैत्यराट्।
अभ्यागतं स्वयं विष्णुं महाहर्षसमन्वितः॥
पूजयामास विधिना निवेश्य कुसुमासने।
प्रणिपत्य नमस्कृत्य प्राह गद्गदया गिरा॥
धन्योऽस्मि कृतकृत्योऽस्मि सफलं जीवितं मम।
त्वामर्च्चयित्वा विप्रेन्द्र! किं करोमि तव प्रियम्॥
आगतोऽसि यदर्थं त्वं मामुद्दिश्य द्विजोत्तम।
तत् प्रयच्छामि ते शीघ्रं ब्रूहि वेदविदां वर॥
ततः प्रहृष्टमनसा तमुवाच महीपतिम्।
शृणु राजेन्द्र! वक्ष्यामि ममागमनकारणम्॥
अग्निकुण्डस्य पृथिवीं देहि दैत्यपते मम।
मम त्रिविक्रमं पादं महीं संदातुमर्हसि॥
सर्व्वेषामेव दानानां भूमिदानमनुत्तमम्।
यो ददाति महीं राजन् विप्रायाकिञ्चनाय वै॥
अङ्गुष्ठमात्रमथवा स भवेत् पृथिवीपतिः।
न भूमिदानसदृशं पवित्रमिह विद्यते॥
तस्माद्भूमिं महीपाल प्रयच्छ त्रैपदं मम।
एतदल्पमहीं दातुं मा विशङ्क महीपते॥
जगत्त्रयप्रदानन्तत् मम भूप भविष्यति।
ततः प्रहृष्टवदनस्तथेत्याह महीपतिः॥
तस्मै महीप्रदानन्तु कर्त्तुं मेने विधानतः।
तं दृष्ट्वा दैत्यराजानं तदा तस्य पुरोहितः॥
उशना अब्रवीद्वाक्यं मा राजन् दीयतां मही।
एष विष्णुः परेशो यो देवैः संप्रार्थितो नृप!॥
वञ्चयित्वा महीं सर्व्वां ततः प्राप्तुमिहागतः।
तस्मान्मही न दातव्या तस्मै राजन् महात्मने॥
अन्यमर्थं प्रयच्छस्व वचनान्मम भूपते!।
ततः प्रहस्य राजासौ तं गुरुं प्राह धैर्य्यतः॥
प्रीतये वासुदेवस्य पुण्यं सर्व्वं कृतं मया।
अद्य धन्योऽस्म्यहं विष्णुः स्वयमेवागतो यदि॥
तस्यार्पयामि राज्यं हि जीवितञ्च महन्मम।
तस्मादस्मै प्रयच्छामि त्रीन् लोकानपि माचिरम्॥
इत्युक्त्वा भूपतिस्तस्य पादौ प्रक्षाल्य भक्तितः।
वाञ्छितां प्रददौ भूमिं वारिपूर्व्वं विधानतः॥
परिणीय नमस्कृत्य दत्त्वा वै दक्षिणां वहु।
उवाच तं वटुं विप्रं प्रहर्षणान्तरात्मना॥
धन्योऽस्म्यनुगृहीतोऽस्मि तव दत्त्वा महीं द्विज।
यथेष्टं तव विप्रेन्द्र तद्गृहाण महीमिमाम्॥
पञ्चाशत्कोटिविस्तीर्णां सकाननमहीधराम्।
ससागराञ्च सद्वीपां सदेवासुरमानुषाम्॥
पादेनैकेन पुरुषो विक्रम्य मधुसूदनः।
उवाच तं दैत्यराजं किं करोमीति शाश्वतम्॥
तत्र त्रैविक्रमं रूपमीश्वरस्य महौजसः।
सम्मातुमपि देवानामृषीणाञ्च महात्मनाम्॥
न वक्तुमपि शक्यं स्यात् ब्रह्मणः शङ्करस्य च।
तत्पदं पृथिवीं सर्व्वामाक्रम्य गिरिजे शुभे॥
अतिरिक्तं समभवत् शतयोजनमायतम्।
दिव्यं चक्षुर्ददौ तस्मै दैत्यराज्ञे सनातनः॥
तस्मै सन्दर्शयामास स्वकं रूपं जनार्द्दनः।
तद्विश्वरूपं देवस्य दृष्ट्वा दैत्येश्वरो बलिः॥
प्रहर्षमतुलं लेभे सानन्दाश्रुपरिप्लुतः।
दृष्ट्वा देवं नमस्कृत्य स्तुत्वा स्तुतिभिरेव च॥
प्राह गद्गदया वाचा प्रहर्षणान्तरात्मना।
धन्योऽस्मि कृतकृत्योऽस्मि त्वां दृष्ट्वा परमेश्वरम्॥
लोकत्रयं ममैवैतत् गृहाण मधुसूदन।
अथ सर्व्वेश्वरो विष्णुर्द्वितीयं पदमव्ययम्॥
ऊर्द्ध्वं प्रसारयामास ब्रह्मलोकान्तमच्युतः।
सनत्नक्षत्रग्रहोपेतं सर्व्वदेवसमावृतम्॥
पादेनापरिपूर्णोऽभूदच्युतः स शुभानने।
ततः पितामहो दृष्ट्वा चक्रपद्मादिचिह्नितम्॥
श्रीपादं देवदेवस्य हर्षसंभ्रमचेतसा।
धन्योऽस्मीति वदन् ब्रह्मा गृहीत्वा स्वं कमण्डलुम्॥
भक्त्या प्रक्षालयामास तत्र संस्थितवारिणा।
आश्चर्य्यमभवत्तोयं तस्य विष्णोः प्रभावतः॥
तत्तीर्थं मेरुशिखरे प्रापतद्विमलं जलम्।
जगतः पावनार्थाय चतुर्द्दिक्षु प्रवाहितम्॥
सीता चालकनन्दा च वङ्क्षुर्भद्रा यथाक्रमात्॥
प्रसङ्गादिदमाख्यातं गङ्गाजन्म ह्यनुत्तमम्॥
ततो नारायणः श्रीमान् बलेर्दैत्यपतेः प्रभुः।
रसातलं शुभं लोकं प्रददौ भक्तवत्सलः॥
सर्व्वेषां दानवानाञ्च नागानां यादसाम्पतेः।
राजानञ्च बलिञ्चक्रे यावदाभूतसंप्लवम्॥
प्रतिगृह्य बलेर्लोकान् वटुवेशेन दैत्यहा।
महेन्द्राय ददौ प्रीत्या काश्यपिर्व्विष्णुरव्ययः॥
ततो देवाः सगन्धर्व्वा ऋषयश्च महौजसः।
तुष्टुवुः स्तुतिभिर्दिव्यैः पूजयामासुरच्युतम्॥
संक्षिप्य तन्महद्रूपं तेषां सन्दर्शनाय वै।
संपूज्यमानस्त्रिदशैरन्तर्धानं ययौ हरिः॥"
इति पाद्मोत्तरखण्डे ४९ अध्यायः॥ *॥
तदवतारप्रकारान्तरं यथा,—
नारद उवाच।
"सांप्रतं भगवान् विष्णुस्त्रैलोक्याक्रमणं वपुः।
करिष्यति जगत्स्वामी बलेर्बन्धनमीश्वरः॥
तत् कथं पूर्व्वकालेऽपि विभुरासीत् त्रिविक्रमः।
कस्य वा बन्धनं विष्णुः कृतवांस्तच्च मे वद॥
पुलस्त्य उवाच।
श्रूयतां कथयिष्यामि योऽयं प्रोक्तस्त्रिविक्रमः।
यस्मिन् काले सम्भूव यञ्च वञ्चितवानसौ॥